CAREERINDIA

**Code No. 09**

Total No. of Questions : 46 ] [ Total No. of Printed Pages : 7

**March, 2009**

# SANSKRIT

Time : 3 Hours 15 Minutes ] [ Max. Marks : 100

I. एतेषां **दशानामपि** प्रश्नानां उत्तराणि एक वाक्येन संस्कृतभाषायां लिखत — 10 × 1 = 10

1) केषां प्रतिमाः देवकुले स्थाप्यन्ते ?

2) काभ्यां सह रामः वनमगच्छत् ?

3) कस्मात् मातापि अमाता भवति ?

4) सागरिकायाः चिन्ता कं बाधते ?

5) कां न दहत्येव पावकः ?

6) उदयनस्य नाम किम् ?

7) ऐन्द्रजालिकस्य नाम किम् ?

8) कुन्त्याः अपरं नाम किम् ?

9) कुरुपाण्डवानां वंशः कः ?

10) कः क्षत्रियाणां धर्मः ?

www.careerindia.com

[ Turn over

CAREERINDIA



II. एतेषु **त्रयाणां** भाषान्तरं कृत्वा भावं विशदयत — 3 × 4 = 12

11) द्रुमा धावन्तीव द्रुतरथगतिक्षीणविषया
नदीवोद्वृत्ताम्बुर्निपतति मही नेमिविवरे ।
अख्यकिर्नष्टा स्थितमिव जवाच्चक्रवलयं
रजश्चाश्वोद्धूतं पतति पुरतो नानुपतति ॥

12) अयशासि यदि लोभः कीर्तयित्वा किमस्मान्
किमु नृपफलतर्षः किं नरेन्द्रो न दद्यात् ।
अथ तु नृपतिमातेत्येष शब्दस्तवेष्टो
वदतु भवति सत्यं किं तवार्यो न पुत्रः ॥

13) हर्म्यणां हेमशृङ्गश्रियमिव निचयैरर्चिषामादधानः
सान्द्रोद्यानद्रुमाग्रग्लपनपिशुनितात्यन्ततीव्राभितापः ।
कुर्वन्क्रीडामहीध्रं सजलजलधरश्यामलं धूमपातै -
रेष प्लोषार्तयोषिज्जन इह सहसैवोत्थितोऽन्तःपुरेऽग्निः ॥

14) विरम विरम वह्ने मुञ्च धूमानुबन्धं
प्रकटयसि किमुच्चैरर्चिषां चक्रवालम् ।
विरहहतभुजाऽहं यो न दग्धः प्रियायाः
प्रलयदहनभासा तस्य किं त्वं करोषि ॥

15) भगवति जगदम्ब त्वत्प्रसादादू दूरात्मा
हत इह बकदैत्यो सन्ति चान्ये बकाभाः ।
वितर बलमथैवं हन्तुमस्माकमेतान्
जयतु भुवि नरेन्द्रो धर्मराजश्चिराय ॥

www.careerindia.com

CAREERINDIA



III. अ) **एकस्य** उत्तरं संस्कृतभाषाया प्रादेशिकभाषायां आंग्लभाषायां व प्रबन्धरूपेण उत्तरं लिखत — 1 × 8 = 8

16) भासरूपकाणां साम्यांशाः के ?

17) कुन्ती ब्राह्मणकुटुम्बयोः संवादं विलिख्य परिणामं विशदयत ।

आ) **द्वयोरेव** लघुटिप्पण्यौ प्रादेशिकभाषायां आंग्लभाषायां संस्कृतभाषायां वा लिखत — 2 × 4 = 8

18) ऐन्द्रजालिकः ।

19) प्रवेशकः ।

20) वसन्तकः ।

21) भीमसेनः ।

IV. **चतुर्णां** सन्दर्भं संस्कृतभाषायां सूचयत — 4 × 3 = 12

22) न मया गुरूवचनमतिक्रान्तपूर्वम् ।

23) नायोध्या तं विनायोध्या सायोध्यायत्र राघवः ।

24) याता सुदूरमधुना गजगामिनी सा ।

25) इदानीं सफलपरिश्रमोऽस्मि संवृत्तः ।

26) षडेते मम बान्धवाः ।

27) क्षुधितो व्याघ्रस्तृणानि किं भक्ष्यति ।

V. अ) **एकस्य** उत्तरं संस्कृतभाषाया प्रादेशिकभाषायां आंग्लभाषायां वा प्रबन्धरूपेण उत्तरं लिखत — 1 × 10 = 10

28) चन्द्रहासं मारयितुं दुष्टबुद्धिना कृतमुपायं तस्य परिणामं च विशदयत ।

29) सलादीनेन नाथनं प्रति कः प्रश्नः प्रदत्तः ? तस्य नाथनः किमुत्तरं प्रायच्छत् ?

[ Turn over

www.careerindia.com

CAREERINDIA



आ) **द्वयोः** संस्कृतभाषायां प्रादेशिकभाषायां आंग्लभाषायां वा लघुटिप्पण्यौ लिखत — 2 × 5 = 10

30) पुरोहितः ।

31) शृगालः ।

32) अलसपुत्राः ।

33) विषया ।

VI. **पञ्चानां** उपप्रश्नानां संस्कृतभाषायां उत्तराणि लिखत — 5 × 2 = 10

34) **द्वयोः** सन्धिं विभज्य संधिर्नाम लिखत —

अत्रेदानीम् , सोऽपि, जगदीशः, अधुनैव ।

35) **द्वयोः** लिङ्गविभक्तिवचनानि लिखत —

पादयोः, कुन्तीम् , भिषजम् , रामेण ।

36) **द्वयोः** लकारपुरुषवचनानि लिखत —

अभवत् , भविष्यन्ति, नृत्यामि, भवेत् ।

37) **द्वयोः** विग्रहवाक्यं लिखत —

जलाञ्जलिः, सत्यवचनम् , चक्रपाणिः, भीमार्जुनौ ।

38) **द्वयोः** व्याकरणरीत्या पदपरिचयं लिखत —

स्मृत्वा, उपविश्य, नेतव्यः, सौमित्रिः ।

39) प्रयोगपरिवर्तनं कुरुत —

सः पायसं पिबति ।

**अथवा**

अहं भवन्तं न प्रतिषेधयामि ।

www.careerindia.com

CAREERINDIA



40) एतयो: वाक्ययो: व्याकरणदोषं परिहृत्य लिखत —

i) अलं विशङ्का ।

ii) धिक् भीमसेन: ।

41) अत्रत्यमलङ्कारसंलक्षणं निर्दिशत —

दुर्जनैरभिभूतैषा कुन्तीव परिशोचति ।

VII. 42) संस्कृतभाषायां अनुवदत — 5

ಒಂದಾನೊಂದು ಕಾಲದಲ್ಲಿ ದೇವಶರ್ಮನೆಂಬ ವಿದ್ವಾಂಸನೊಬ್ಬನಿದ್ದನು. ಅವನ ಪುತ್ರ ಮಲ್ಲಿನಾಥ. ಬಾಲ್ಯದಿಂದಲೂ ಅವನಿಗೆ ಓದುವುದರಲ್ಲಿ ಆಸಕ್ತಿ ಇರಲಿಲ್ಲ. ಅವನು ಯೌವನಸ್ಥನಾದ ಮೇಲೆ ಅವನಿಗೆ ವಿವಾಹವಾಯಿತು. ಅವನು ಮಾವನ ಮನೆಗೆ ಹೋದಮೇಲೆ ವಿದ್ಯಾವಂತರಾಗಿದ್ದ, ಅವನ ಭಾವಮೈದುನರು ಅವನನ್ನು ಹಾಸ್ಯ ಮಾಡಿದರು. ಆಗ ತನ್ನ ತಪ್ಪನ್ನು ತಿಳಿದ ಅವನು ಕಾಶಿಗೆ ಹೋಗಿ ಗುರುವಿನ ಬಳಿ ವಿದ್ಯಾಭ್ಯಾಸ ಮಾಡಿದನು. ಬಹಳ ಕಷ್ಟಪಟ್ಟು ಅವನು ದೊಡ್ಡ ವಿದ್ವಾಂಸನಾದನು.

Once upon a time there was a scholar by name Devasharma. He had a son called Mallinatha. Even as a boy he was disinterested in studies. When he attained youth, he got married. However, he was insulted in the house of his father-in-law by his brothers-in-law who were all learned. Realising his fault, he went to Kashi and studied under a scholar. With great difficulty, he became a great scholar.

43) इमं परिच्छेदं पठित्वा प्रश्नानां उत्तराणि लिखत — 5 × 1 = 5

कश्चित् अन्ध: रात्रौ विपणि मार्गेण गच्छतिस्म । स: अतीव बुद्धिमान् विनयवांश्च आसीत् । स: दक्षिणहस्ते दण्डमधारयत् । वामहस्तेन च प्रदीपमेकमवहत् । तस्य पुर: कश्चित्



www.careerindia.com

CAREERINDIA



कुटिलमतिः कुमारः अभ्यागच्छत् । अन्धं दृष्ट्वा चेष्टां कर्तुं ऐच्छत् । अतः अपृच्छत् । कस्मात् त्वम् अन्धः सन् दीपं वहसि ? किमनेन ते प्रयोजनम् ? इति । इदं श्रुत्वा अन्धः खिन्नः अभवत् । बालः प्रहासार्थं अपृच्छत् इति ज्ञात्वा 'भद्र सत्यं न मे दीपेन प्रयोजनम् । तथापि रात्रौ दीपेन मां पश्यन् न कोऽपि मयि निपतिष्यति । तस्मात् मया घृतोदीप' इत्यवदत् । कुमारः तद्वचनं श्रुत्वा लज्जितः तूष्णीं गतः ।

i) रात्रौ अन्धः केन मार्गेण गच्छति स्म ?

ii) अन्धः दक्षिणहस्ते किमधारयत् ?

iii) अन्धं दृष्ट्वा कुमारः किमिति अपृच्छत् ?

iv) कुमारस्य वचनं श्रुत्वा अन्धः किमभवत् ?

v) कुमारः किमर्थं तूष्णीं गतः ?

**अथवा**

भवतः परीक्षासिद्धतां अधिकृत्य पित्रे पत्रमेकं लिखत ।

44) श्लोकस्यास्य अन्वयं लिखत — 3

काक आह्वयते काकान् याचको न तु याचकान् ।

काकयाचकयोर्मध्ये वरं काको न याचकः ॥

45) यथानिर्देशं कुरुत — **( त्रयाणामेव )** 3

i) कण्ठस्य आभरणम् .................... । ( समस्तपदम् )

ii) यदा–तदा, यावत् ..................... । ( नित्यसम्बन्धिपदम् )

iii) वन + ........................ = वनौषधम् । ( रिक्त स्थानं पूरयित्वा, सन्धिनाम )

iv) अभिषेकनाटकम् ............................ । ( कवेः नाम )

www.careerindia.com

CAREERINDIA



46) परिच्छेदं पठित्वा आवरणस्थानि पदानि चित्वा परिच्छेदं पूरयत — 4

अस्माकं .............................. स्वातन्त्र्यार्थम् अनेकाः वीरस्त्रियः स्वप्राणान् अत्यजन् । तासु कर्नाटकस्य कित्तूरूप्रान्तस्य राज्ञी चेन्नम्मा ........................ । .......................... विरुद्धं संभवति स्वातन्त्र्यसमरे तया अग्रतमं स्थानं .............................. । सा कित्तूरूनायकस्य ....................... द्वितीया राज्ञी आसीत् । ............................. मृतोऽपि न भीत्वा दत्तकपुत्रं स्वीकृत्य राज्यभारम् .................................... । प्रथम राज्ञी रुद्रम्मा राज्यभारविषये अनासक्ता ........................ ।

( अग्रेसरा, देशस्य, आंग्लानां, मल्लसर्जस्य, गृहीतम् , आसीत् , स्वपुत्रः, अकरोत् )

www.careerindia.com